अद्वारेण कापथेन क्वचिदपि नगरे ग्रामे मन्दिरे वा न प्रविशेत् । न कृपणस्य शास्त्रातिक्रमकारिणो राज्ञः सकाशात् प्रतिगृह्णीयात्” मिता० । “प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः । दुष्टा दशगुणं पूर्व्वात् पूर्व्वादेते यथाक्रमम्” याज्ञ० । प्रतिग्रहेषु वाच्येषु सून्यादयः पञ्च पूर्व्वस्मात् पूर्व्वस्मात् परःपरो दशगुणं दुष्टाः । सूना प्राणिहिंसा सा अस्यास्तीति सूनी प्राणिहिंसापरः चक्री तैलिकः । ध्वजी सुराविक्रयी । वेश्या पण्यस्त्री । नराधिपः अनन्तरोक्तः” मिता० ।

“देवर्त्विक्स्नातकाचार्य्यराज्ञां छायां परस्त्रियाः । नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्त्तनादि च” याज्ञ० । “देवानामृत्विक् स्नातकाचार्य्यराज्ञां परस्त्रियाश्च छायां नाक्रामेत् नाधितिष्ठेन्न लङ्घयेद् बुद्धिपूर्व्वम् यथाह मनुः “देवतानां गुरो राज्ञः स्नातकाचार्य्ययोरपि । नाक्रामेत् कामतश्छायां बभ्रुणो दीक्षितस्य च” इति । बभ्रुणो नकुलवर्णस्य यस्य कस्य चिद्वारन्यस्य वा सोमादेर्बभ्रुण इति नपुंसकलिङ्गनिर्द्देशात् । रक्तादीनि च नाधितिष्ठेत् । आदिग्रहणात् स्नानोदकादेर्ग्रहणम् “उद्वर्त्तनमपःस्नानं विण्मूत्रं रक्तमेव च । श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत कामतः” इति मिता० । “विप्राहिक्षत्रियात्मानो नावज्ञेयाः कदाचन । आमृत्योः श्रियमाकाङ्क्षेन्न कञ्चिन्मर्म्मणि स्पृशेत्” याज्ञ० । “विप्रो बहुश्रुतोऽहिः सर्पः क्षत्रियो नृपतिः । एते कदाचिदपि नावमन्तव्या आत्मा च स्वयं नावमन्तव्यः । आमृत्योर्यावज्जीवं श्रियमिच्छेन्न कञ्चिन्मर्म्मणि स्पृशेन्न कस्यचिदपि मर्म्म दुश्चरितं प्रकाशयेत्” मिता० । “दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत् । श्रुतिस्मृत्युदितं सम्यक् नित्यमाचारमाचरेत्” याज्ञ० । “भोजनाद्युच्छिष्टं विण्मूत्रे पादप्रक्षालनजलञ्च गृहाद् दूरात् समुत्सृजेत् । श्रौतं स्मार्त्तं चाचारं नित्यं सम्यगनुतिष्ठेत्” मिता० । “गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत् । न निन्दाताडने कुर्य्यात् पुत्रं शिष्यं च ताडयेत्” याज्ञ० । गां ब्राह्मणमग्निमन्नमदनीयं विशेषतः पक्वमशुचिर्न स्पृशेत् । पादेन त्वनुच्छिष्टोऽपि “यदा पुनः प्रमादात् स्पृशति तदाचमनोत्तरकालं मन्त्रं कार्य्यम् “स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् । गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु” इति एवं प्राणादीनुपस्पृशेत् । कस्यचिदपि निन्दाताडने न कुर्य्यात् । एतच्चानपकारिणः “अयुध्यमानस्योत्पाद्य ब्राह्मणस्याङ्गमन्ततः । दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः” इति । पुत्रशिष्यौ शिक्षार्थमेव ताडयेत् । चकाराद्दासादीनपि । ताडनञ्च रज्ज्वादिनोत्तमाङ्गव्यतिरेकेण कार्य्यम् “शिष्यशिष्टिरबधेनाशक्तौ रज्जुवेणुदलाभ्यां तनुभ्यामन्येन घ्नन् राज्ञा शास्यः” इति गौतमवचनात् । “पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन” इति मनुवचनात्” मिता० । “कर्म्मणा मनसा वाचा यत्नाद्धर्म्मं समाचरेत् । अस्वर्ग्यं लोकविद्विष्टं धर्म्ममप्याचरेन्न तु” याज्ञ० । कर्म्मणा कायेन यथाशक्ति धर्म्ममनुतिष्ठेत् । तमेव मनसा ध्यायेत् । वाचा वदेत् । धर्म्मं विहितमपि लोकविद्विष्टं लोकाभिशस्तिजनकं मधुपर्के गोबधादिकं नाचरेत् । यस्मादस्वर्ग्यमग्नीषोमीयवत् स्वर्गसाधनं न भवति” मिता० । “मातृपितृतिथिभ्रातृजामिसम्बन्धिमातुलैः । वृद्धबालातुराचार्य्यवैद्यसंश्रितबान्धवैः । ऋत्विक्पुरोहितापत्यभार्य्यादाससनाभिभिः । विवादं वर्जयित्वा तु सर्व्वांल्लोकाञ्जयेद् गृही” याज्ञ० । माता जननी । पिता जनकः । अतिथिरध्वनीनः । भ्रातरो भिन्नोदरा अपि । जामयो विद्यमानभर्त्तृकाः स्त्रियः । सम्बन्धिनो वैवाह्याः । मातुलो मातुर्भ्राता । वृद्धः सप्तत्युत्तरवयस्कः । बालः आषोड़शाद्वर्षात् । आतुरो रोगी । आचार्य्य उपनेता । वैद्यो विद्वान् भिषग्वा । संश्रित उपजीवी । बान्धवाः पितृपक्षा मातृपक्षाश्च । मातुलस्य पृथगुपादानम् आदरार्थम् । ऋत्विग्याजकः । पुरोहितः शान्त्यादेः कर्त्ता । अपत्यं पुत्रादि । भार्य्या सहधर्म्मचारिणी । दासः कर्म्मकरः । सनाभयः सोदराः भ्रातृव्यः पृथगुपादनं अजामिभगिनीप्राप्त्यर्थम् । एतैर्मात्रादिभिः सह वाक्कलहं परित्यज्य सर्व्वान् प्राजापत्यादीन् लोकान् प्राप्नोति” । “पञ्चपिण्डाननुद्धृत्य न स्नायात् परवारिणि । स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च” याज्ञ० । परवारिषु परसम्बन्धिषु सर्व्वस्वत्वोद्देशेन त्यक्तेषु तड़ागादिषु पञ्चपिण्डाननुद्धृत्य न स्नायात् । अनेनात्मीयोत्सृष्टाभ्यनुज्ञातेषु पिण्डोद्धरमन्तरेणापि स्नानमभ्यनुज्ञातम् । नद्यादिषु कथं नहीत्याह स्नायान्नदीति । साक्षात् परम्परया वा समुद्रगाः स्रवन्त्यो नद्यः । देवखातं देवनिर्म्मितं पुष्करादि । उदकप्रवाहाभिघातकृतजलो महानिम्नप्रदेशो ह्रदः । पर्व्वताद्युच्चप्रदेशात् प्रस्रुतम् उदकं प्रस्रवणं एतेषु पञ्चपिण्डानुद्धरणेनैव स्नायात् । एतच्च नित्यस्नानविषयम् सति सम्भवे